Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 1 | ISSN : 2581- 6306

# व्याकरणस्य पञ्चाङ्गता-विमर्शः



**डॉ०- प्रियरंजन मिश्रः**
**पितुर्नाम- श्री सच्चिदानन्द मिश्रः**
**ग्रामः- मिल्की, पत्रालयः- हरदिया,**
**भाया- सिंघिया, मण्डलम्- समस्तीपुरम्, भारत।**

**'पञ्चाङ्गव्याकरणम्'** संस्कृतभाषायाम् यावन्ति उपलब्धानि परिज्ञातानि वा व्याकरणानि सन्ति तानि प्रायः पञ्चाङ्गेषु विभक्तानि, तेनैव कारणेन वैयाकरण-परम्परायां व्याकरणस्य कृत्स्नता-द्योतनाय पञ्चाङ्गव्याकरणम्'' इत्यादि-शब्देन व्यवहारः प्रचलति। प्रबन्धचिन्तामणौ पञ्चाङ्गव्याकरणस्य एवम् उल्लेखः प्राप्यते। "हेमचन्द्राचार्यः श्रीहेमाभिधानाभिधं पञ्चाङ्गमपि व्याकरणं सपादलक्षपरिमाणं संवत्सरेण रचयाञ्चक्रे''।[1]

बुद्धिसागरसूरिरचित-बुद्धिसागरव्याकरणस्य अपरं नाम पंचग्रन्थी विद्यते, यत्र सूत्रपाठेन साकं खिलपाठग्रन्थानां प्रवचनं जातम्, येन "पंचग्रन्थौ'' इति नाम्ना प्रसिद्धम्।

व्याकरणशास्त्रस्य पञ्चाङ्गानि सन्ति- **(1) शब्दानुशासनम् सूत्रपाठः (2) धातुपाठः (3) गणपाठः (4) लिङ्गनुशासनं (5) शिक्षा** च। केचित् शिक्षास्थाने उणादिसूत्राणि परगिणयन्ति। अन्ये तु तत्र परिभाषापाठं समावेशयन्ति। अत्र एकः प्राचीनः श्लोकः दृश्यते-

**"अष्टकं गणपाठश्च धातुपाठस्तथैव च।**
**लिङ्गनुशासनं शिक्षा पाणिनीया अमी क्रमात्''।।**[2]

पं॰ युधिष्ठिरमीमांसकस्या अनुसारेण- पञ्चाङ्गेषु शब्दानुशासनं मुख्यम्, अन्यानि चत्वारि अंगानि शब्दानुशासनस्य उपकारकानि, तेन शब्दानुशासनापेक्षया इमानि गौणानि सन्ति। अतएव धातुपाठादयः शब्दानुशासनस्य खिलभूताः सन्ति। खिल-शब्दो हि शतपथ-सांख्यायन-ब्राह्मणयोः **"ऊसर''** भूमये प्रयुक्तः अस्ति। गोपथ- ब्राह्मणे मनुस्मृत्यादौ च खिलशब्दः ग्रन्थस्य परिशिष्टरूपेण बोध्यते। एवञ्च शब्दानुशासनातिरिक्ता पाणिनीयग्रन्थेन सम्बद्धाः ये सन्ति ते खिलशब्देन परिशिष्टशब्दानि प्रयुज्यन्ते। धातु-पाठादीनाम् अंगानां कृते खिलशब्दस्य प्रयोगः काशिकायामुपलभ्यते स च प्रयोगः अष्टाध्यायाः "उपदेशेऽजनुनासिक इत '' सूत्रस्य व्याख्यायां काशिकाकारेण एवं लिखितमस्ति-

**"उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च''।**[3] तत्र चकारस्य व्याख्याने न्यासे एकमुक्तमस्ति- खिलपाठो- धातुपाठः चकारात् प्रातिपादिक-पाठश्च। खिलं नाम परिशिष्टमेव।

वैदिकवाङ्मये प्रयुक्तस्य खिलशब्दस्य प्रयोगः स्वशाखा अनधीत-स्वशाखीय-कर्मोपयोगि- परशाखीय- मंत्र- संग्रहस्यार्थे मिलति। खिलशब्देन अवयवमपि गृह्यते।

**1. शब्दानुशासनम्-** पाणिनीयशास्त्रस्य चत्वारि नामानि उपलभ्यन्ते- अष्टकं, अष्टध्यायी, शब्दानुशासनं, वृत्तिसूत्रञ्च। अष्टसु अध्यायेषु विभक्तत्वात् पाणिने: ग्रन्थनाम अष्टकं अष्टध्यायी चेति प्रसिद्धम्। तत्रापि अष्टध्यायी सर्वलोकेषु विश्रुता अस्ति।

शब्दानुशासनं व्याकरणस्येदं नाम महाभाष्यस्य प्रांरभे प्रतिज्ञावाक्यरूपेण समुपलभ्यते। तत्र लिखितमस्ति **"अथ शब्दानुशासनम्''** अथेति शब्द: अधिकारार्थ: प्रयुज्यते, शब्दानुशासनं नाम शास्त्रमधिकृतम् वेदितव्यम्।[4] यथा हेमचन्द्राचार्यस्य काव्यानुशासनम्, पतञ्जले: योगानुशासनं तथैव व्याकरणस्यापरं नाम शब्दानुशासनम्।

शब्दानुशासनमिति नामकरणस्य पृष्ठे उपजीव्यत्वम् आपिशलं तन्त्रं निर्वहति, यतो हि पाणिने: अष्टाध्याय्यां ये अष्टौ अध्याया: एवञ्च यानि अष्ट प्रकरणानि सन्ति तानि पाणिने: पूर्वभाविन: अपिशले: शब्दानुशासनम् सन्ति। अपिशले: शब्दानुशासने शिक्षायाञ्च अष्टौ अध्याय:प्रकरणानि च अष्ट सन्ति। उभयो: आर्चाययो: ग्रन्थयो: वर्तमाने समानता परिदृश्यते, येन ज्ञातो भवति यत् पाणिनीयतन्त्रस्य मुख्यम् उपजीव्य-मापिशल-तन्त्रम्। पदमञ्जरीकार: अपि अत्र स्वमतं स्पष्टयति- "कथं पुनरिदमाचार्येण पाणिनिनाऽवगतमेते साधव इति''? आपिशलेन पूर्वव्याकरणेन आपिशलिना तर्हि केनावगतम् ? तत: व्याकरणेन-पाणिनिरपि स्वकाले शब्दान् प्रत्यक्षयननापिशलादिना पूर्वस्मिन्नपि काले सत्तामनुसन्धत्ते एवमपिशलि:।[5]

पाणिने: शब्दानुशासननामकं शास्त्रं सूत्राधारितं वर्तते, सूत्राणि तु महेश्वर प्रोक्तानि- **"अइउण्''**........ इत्यादि - चतुर्दश सन्ति। तानि सूत्राणि आधारीकृत्य लौकिकान शब्दान् अनुशासितुं भगवान् पाणिनि: शब्दानुशासनं नाम शास्त्रं रचयामास। शब्दान् लक्ष्यीकृत्य लक्ष्यैक चक्षुष्का: प्रमाणभूता: आचार्या: पाणिनय: प्राय: चत्वारि सहस्राणि सूत्राणि प्रणीतवन्त:। सूत्रं व्याकरणं अस्ति वा शब्द: इति जिज्ञासां समुत्थाय भगवान् पतञ्जलि:'' लक्ष्यलक्षणे व्याकरणम्''[7] इति सिद्धान्तवर्त्तिक द्वारा स्वमत-मुपन्यस्तवान् अर्थात् लक्ष्यं लक्षणञ्च, उभयो: समुदितम् व्याकरणं शब्दानुशासननाम्ना प्रसिद्धम्। अथवा व्यपदेशिवद्भावत्वात् व्याकरण-मित्यस्यार्थ: सूत्रम् इति सिद्धान्तसिद्धं जातम्।

भवतु नाम सूत्रम् किन्तु सूत्रस्य निर्माणं लक्ष्यैकचक्षुष्का आचार्या: शब्दान् दृष्ट्वैव कृतवन्त:। अत: सूत्रद्वार शब्दानुशासनमेव भवति। स च शब्द: भाष्यानुसारेण उभयविध: लौकिको वैदिकश्च, तेन शब्दकर्मकमनुशासनम् शब्दानुशासनस्यार्थ: सिद्धयति। अनुशासनं नाम अपरशब्देभ्यो विविच्य कथ्यन्ते साधु शब्दा अनेन इत्यनुशासनम्। तच्च अनुशासनं सूत्रं विना न सुकरम्। अत: सूत्रद्वारा शब्दाना- मनुशासनं भवति अर्थात् सूत्रमाध्यमेनैव ज्ञायते यत् अयं शब्द: व्याकरणद्वारा संस्कारसम्पन्न: परिशुद्ध: व्याकरणद्वारा सुसंस्कारित: शब्द: संस्कृतशब्द: उच्यते। एतादृशस्य शब्दस्य संस्कारकरणे व्याकरणस्य महत्वपूर्णयोगदानं लक्ष्यीकृत्य व्याकरणस्य नाम शब्दानुशासनं सन्धारितम्।

व्याकरणे सूत्रपाठ: विद्यते, तत्र सूत्रं किम्? सूत्रं तु तदेव भवति यत्र अल्पाक्षर- मसन्दिग्ध- मक्षरं तिष्ठति, किनतु तदक्षरं सारवत् सर्वतोमुखम् बहवार्थ-प्रकाशन-सक्तम्। एवञ्च अव्याप्ति- अतिव्याप्ति- असंभव- दोषत्रयरहितं यदि स्यात् तदा तदक्षरं सूत्ररूपेण सूत्रज्ञै: भणितम्।यथाह-

**अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।**

**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदु:।।**

इति लक्षणलक्षितं सूमस्ति पाणिनीयव्याकरणस्य।

पाणिनीयव्याकरणे अष्टौ अध्याया: सन्ति। तत्र सर्वे अध्याया: चतुर्षु–चतुर्षु पादेषु विभक्ता: सन्ति। तत्र प्रत्येकं पादे अनेकानि सूत्राणि सन्ति, तानि सूत्राणि मिलित्वा प्राय: चतु: सहस्राणि भवन्ति। इतिहासानुसारेण **3996** सूत्राणि सन्ति यथा–

**"त्रीणि सूत्रसहस्राणि तथा नव शतानि च।**

**षण्णवतिश्च सूत्राणां पाणिनी: कृतवान् स्वयम्।''**

पुनश्च– **चतु: सहस्री सूत्राणि पञ्चसूत्रविवर्जिता''।**[8]

एतेषां सूत्राणामपि षट् सूत्राणि आधारीकृत्य विभाजनं कृतमस्ति– आचार्यै:। यथा–

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**[9]

तथा च संज्ञा– परिभाषा– विधि– नियम– अतिदेश– अधिकारभेदात् षड्विधं सूत्रलक्षणं प्रोक्तम्।

तत्र संज्ञा– लक्षणं सूत्राणि च सन्ति विविधसूत्रघटकपदशक्तिग्रहे उपयोगकारकम्। यथा-**"वृद्धिरादैच्''** (1/1/1), **"अदेङ्गुण:"** (1/1/2) **"आदिरन्त्येन सहेता''** (1/1/71), इत्यादीनि। अत्र विविधै: सूत्रै: एकाक्षरद्वयक्षर–त्र्यक्षर– चतुरक्षर–पंचाक्षर–षडक्षर–सप्ताक्षरसंज्ञा: विधीयन्ते।[10]

तत्र एकाक्षरसंज्ञा रूपेण– इत्, उ, उत्, उत, लुक, श्लु, षष्, सत् इत्यादय:, द्वयक्षरसंज्ञा:–अङ्ग–कर्तृ–गति –गुण–वृद्ध्यादय:। त्र्यक्षरसंज्ञा:–अपृक्त–अभ्यस्त–अभ्यास–अव्ययादय:। चतुरक्षरसंज्ञा:– अनुदात्त– अपादान–अवासन–उपपदादय:। पंचाक्षरसंज्ञा:– अनुनासिक–अधिकरण–अव्ययीभावादय:। षडक्षरा– सर्वनामस्थानसंज्ञा। सप्ताक्षरा– कर्मप्रवचनीयसंज्ञा।

परिभाषालक्षणं सूत्राणि च– **"अनियमेन तत्र तत्र प्रसक्तस्य विधिशास्त्रस्य प्रवृत्तिनियमकरणे उपयोगभूता''। "विप्रतिषेधे परं कार्यम्'' (1/4/2) '' इकोगुणवृद्धी'' (1/1/3) '' आद्यन्तौ टकितौ'' (1/1/46)** इत्यादीनि।

विधेर्लक्षणं सूत्राणि च– **"अपूर्वार्थबोधकं विधिसूत्रम्''। "इको यणचि'' (6/1/77) "एचोऽयवायाव:'' – (6/1/1/78) आद्गुण:''- (6/1/7/78)** इत्यादीनि।

नियम लक्षणं सूत्राणि च – **"इतरनिवृत्तिफलकार्थबोधकं विधिसूत्रम्''। 'पति: समास एव'' (1/4/8) "कृत्तद्धितसमासाश्च'' (1/2/46) "धातोस्तन्निमित्तस्यैव'' (6/1/80)** इत्यादीनि।

अतिदेशलक्षणं सूत्राणि च– **"अन्यत्र अन्यधर्मारोपबोधकमतिदेशसूत्रम्''। "स्थानिवदादेशोऽनल्विधौ'' (1/1/56)'' गोतो णित्'' (6/1/96) –"बहुगणवतुडति संख्या'' (1/1/23)** इत्यादीनि।

अधिकारलक्षणं सूत्राणि च– **"स्वदेशे वाक्यार्थावबोधकमुत्तरोत्तरसूत्रेषु स्वघटकपदसमर्पकम् अधिकारसूत्रम्''। "अव्ययीभाव:'' 2/1/5, "तत्पुरूष:'' 2/1/22, "पूर्वत्रासिद्धम्'' (8/2/1)** इत्यादीनि।

तद्यथा– **'कार्याकार्यनिमित्तानां पदानां यदुदीरणम्''।**

**वक्ष्यमाणार्थ- संक्षेपादधिकार: स उच्यते ।।**

**2. धातुपाठ:-** भगवता पाणिनिना धातुपाठस्य द्विविधं प्रवचनं कृतम् - अर्थ - निर्देशयुक्तम् अर्थनिर्देशरहितञ्च। कस्मैचित् शिष्याय अर्थनिर्देशं विना 'भवेधस्पर्श.'' इति प्रकारेण संहितापाठद्वारा प्रवचनं क्रियते। कश्मेचिच्च शिष्याय **"भू सत्तायाम्'' उदात्त: परस्मैभाष:'' "एध वृद्धौ''** इत्येवं प्रवचनं कृतम।[11] अतएव महाभाष्ये द्विविधो निर्देश: उपलभ्यते- लघुपाठ: वृद्धपाठश्च। अर्थ- निर्देश विना य: धातुपाठ: स लघुपाठ: तथा अर्थनिर्देशयुक्त: य: पाठ: स वृद्धपाठोऽस्ति।

अष्टाध्याय्या: तस्याश्च खिलपाठस्य धातुपाठ-गणपाठ-उणादिपाठ-त्रयस्य विविधपाठानां सूक्ष्मान्वेषणेन इदं निर्णीतं यत् आचार्यस्य पाणिने: पंचाङ्गव्याकरणस्यैव त्रिविध: पाठो विद्यते[12] प्राच्य: उदीच्य: (औदीच्य) दाक्षिणात्यश्च। तत्र प्राच्यपाठ:- अष्टाध्याया: यस्मिन् पाठे काशिका वृत्ति: स एव पाठ: प्राच्यपाठ:। उदीच्य: औदीच्य पाठ: क्षीरस्वाम्यादिभि: कश्मीरै: विद्वद्भि: आश्रीयमाण: सूत्रपाठ: औदीच्यपाठ:। दाक्षिणात्यपाठ: यस्य पाठोपरि कात्यायनमहोदय: वात्रिकं रचयामास स दक्षिणात्यपाठ:। एवञ्च इमे पाठा: भागद्वये विभक्ता: सन्ति- लघुपाठरूपेण वृद्धपाठरूपेण तत्र प्राच्यपाठ: वृद्धपाठरूपेण संकलितोऽस्ति। एवञ्च लघुपाठ: औदीच्य-दाक्षिणात्यपाठरूपेण विख्यात: अस्ति। अन्याशास्त्राणां विविधा: पाठा: - ते विविधा: पाठा: अनेक-प्राचीनशास्त्रेषु उपलब्धा: सन्ति। कस्यचित् द्वौ पाठौ उपलभ्येते-वृद्ध: लघुश्च। यथा-

(i). निरूक्तस्य दुर्गस्कन्दटीके लघुपाठे आश्रिते स्त:। ऋग्भाष्ये सायणेन उद्धृत: पाठ: वृद्धपाठ: अस्ति। निरूक्तस्य द्वयो: द्विविध: हस्तलेख: अद्यावधि प्राप्यते।

(ii). मनुना चाणक्येन सह बहुत्र वृद्ध इति विशेषणं दृश्यते। प्राचीनग्रन्थेषु उद्धृतस्य वृद्धमनो: अनेकानि वचनानि विद्यमानायां मनुस्मृतौ नोपलभ्यन्ते, वर्तमानं मनुपाठ: लघुपाठोऽस्ति । चाणक्यनीते: वृद्ध: लघुश्चपाठ: अद्यपि समुपलभ्यते।

(iii). हारीद्रवीय- गृह्यस्य महापाठस्य एकवचनं कौषीतकिगृह्यस्य भवत्रात् टीकाया: उद्धृतमस्ति।

(iv). भरत- नाट्यशास्त्रस्य अष्टादशसहस्रश्लोकानां वृद्धपाठ: द्वादश-सहस्रश्लोकानां मध्यपाठ: षट् सहस्रश्लोकानां लघुपाठश्च आसन् वर्तमान- नाट्यशास्त्रस्य पाठ: लघुपाठ: अस्ति।

डॉ. सत्यकाम वर्मण: पं. युधिष्ठिरमीमांसकस्य च इतिहासद्वयेन निर्णीयते यत् महाभाष्यकारेण कात्यायनस्य वार्तिके पाठे एव भाष्यं रचितम्। बृहत्पाठ: अन्य परम्परायां सुरक्षित: अतिष्ठत्। तत्र जयादित्येन वामनेन वा स्ववृति: विरचित्ता।

**3. गणपाठ:-** व्याकरणस्य पञ्चाङ्गेषु गाणपाठ: अन्यतम: अयं हि व्याकरणस्य विभिन्नेषु प्रकरणेषु सूत्रवार्तिकै: साकं महत्त्वपूर्णं स्थानं भजते।

**4. लिंगानुशासनम् -** यथा पुरूष:, स्त्री, नपुंसकमिति सर्वोऽपि प्राणिवर्गस्त्रिधा विभक्तस्तथैव शब्दसमवायस्यापि स्थिति:। अतएव पञ्चाङ्गेषु लिंगानुशासनस्थापि अन्यतममङ्गमिति मन्यते ।

**5. उणादि सूत्राणि -** उणादिसूत्राणामुपादेयता विषये पाणिनीयत्वाऽडपणिनीयत्व विषये च पण्डिता नैकत्यं भजन्ते। केचिद् विद्वांस: उणादिसूत्राणि पाणि नीयानि मन्यन्ते केचिद पाणिनीयान्यपि। एवञ्च व्याकरणस्य पञ्चाङ्गत्वमिति शास्त्रे लोके चोपकारकत्वं भजते ।

**सन्दर्भा:-**

1. व्याकरणशास्त्र का इतिहास (युधिष्ठिर नीमांसक) भाग –1
2. व्याकरणशास्त्र का इतिहास (लोकमणि दाहल:) पृ.सं. 103 ।
3. व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीनांसक) भाग– 1, पृ.–2 ।
4. महाभाष्यम् 1/1 (कैयटप्रदीप) पृ.सं. 6 ।
5. पदमञ्जरी (शब्दानुभाग:) 6 ।
7. महाभाष्यम् (कैयटप्रदीप) पृ.सं.–71
8. विष्णुधर्मोत्तर –5/5/1/
9. व्याकरणशास्त्र का इतिहास (लोकमणि दाहल:) पृ.सं.–82
10. व्याकरणशास्त्र का इतिहास पृ. सं.60
11.व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीनांसक) भाग– 2 पृ. सं.60–61
12. व्याकरणशास्त्र का इतिहास (युधिष्ठिर मीनांसक) पृ.सं.– 237–23